जयतु संस्कृतम्  ।। श्रीराधागोविन्दाभ्यां नमः ।।  जयतु भारतम्

# सुलभ-ज्योतिष-मार्त्तण्डः



## कालाङ्गानि
## ( THE ANATOMY OF KALAPURUSA )



कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो
वस्तिर्व्यञ्जनमूरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम्।
मेषाश्विप्रथमानवर्क्षचरणाश्चक्रस्थिता राशयो
राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसम्प्रत्ययाः॥

बृहज्जातकम्, राशिप्रभेदाध्यायः, श्लोकः 4

**प्रयोजनम्**

जन्मकाले यो राशि पापग्रहाक्रान्तः स कालाख्यस्य पुरुषस्य यस्मिनङ्गे स्थितस्तत्रङ्गे जातस्योपघातो वक्तव्यः। यत्र सौम्यः स्थितस्तत्र पुष्टिरिति।

शीर्षानने तथा बाहू हृत्क्रोडकटिवस्तयः
गुह्योरुयुगले जानुयुग्मे वै जङ्घके तथा॥
चरणौ द्वौ तथाऽजादेर्ज्ञेयाः शीर्षादयः क्रमात्।

बृहत्पाराशरहोराशास्त्रम्, राशिशीलाध्यायः, श्लोकः 4




कालात्मकस्य च शिरोमुखदेशवक्षोहृत्-
कुक्षिभागकटिबस्तिरहस्यदेशाः।
उरू च जानुयुगलं परतस्तु जङ्घे पादद्वयं
क्रियमुखावयवाः क्रमेण॥

जातकपारिजातः, राशिशीलाध्यायः, श्लोकः 8


डॉ. मनोजश्रीमालः, सहायकाचार्यः (ज्योतिषविभागः), केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला। दूरभाषः 8894646447


Shrimal Arts